CC-0. In Public Domain. Digitization by eGangotri

श्री सौन्दर्यलहरी

Sri Saundaryalaharee

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri



Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

जय जय शंकर हर हर शंकर काश्री शंकर नेपाल शंकर

श्रीः

विश्वशन्तिमहायज्ञः ६

कार्तिकशुक्लद्वादशी–

कार्तिककृष्णचतुर्थी २०६९ वि.सं

वनकालीधर्मशाला,

पशुपतिनाथमन्दिरसमीपम्,

काष्ठमण्डपम्,

नेपाल

जय जय शंकर हर हर शंकर काश्री शंकर नेपाल शंकर

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Book Name : **Sri Saundarya Lahari**
Language : Sanskrit
Copyright : GIRI
Book Size : Pkt
Published by : GIRI TRADING AGENCY PRIVATE LIMITED
Head. Office : Modi Niwas, Opp.Post Office, Matunga, Mumbai-400 019. ✆ 2414 1344
Admn. Office : 134 (58/2), T.S.V. Koil Street, Mylapore, Chennai-600 004. ✆ 2464 3551

Our Branches:

MUMBAI
Dombivili ✆ 244 9585
Goregaon ✆ 2876 7298
Nerul ✆ 2770 7664
Matunga ✆ 2414 3140
Chembur ✆ 2525 6011

CHENNAI
Mylapore ✆ 2464 0376
Nanganallur ✆ 2267 1335
Alwar Thirunagar ✆ 2377 5483
Anna Nagar ✆ 4266 6921
Kanchipuram ✆ 2722 4415

OTHER CITIES
Coimbatore ✆ 254 1523,
Secunderabad ✆ 2750 3046
Bangalore ✆ 2356 3001
Madurai ✆ 262 8090
Trichy ✆ 2740 772

E-mail : sales@giri.in *Website* : www.giri.in

Specially printed for free distribution on the occasion of "Vishwashanti mahayajnya" conducted by Sri Kanchi Kamakoti Peetham Kashthamandap, Nepal.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

॥ श्री सौन्दर्यलहरी ॥

शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं
न चेदेवं देवो न खलु कुशलः स्पन्दितुमपि ।
अतस्त्वामाराध्यां हरिहर-विरिञ्चादिभिरपि
प्रणन्तुं स्तोतुं वा कथमकृत-पुण्यः प्रभवति ॥ १

तनीयांसं पांसुं तव चरणपङ्केरुह -भवं
विरिञ्चिः संचिन्वन् विरचयति लोकानविकलम् ।
वहत्येनं शौरिः कथमपि सहस्रेण शिरसां
हरः संक्षुद्यैनं भजति भसितोद्धूलन विधिम् ॥ २

अविद्यानां अन्तस्तिमिर-मिहिर-द्वीपनगरी
जडानां चैतन्य-स्तबक-मकरन्द स्रुतिझरी ।
दरिद्राणां चिन्तामणि-गुणनिका जन्मजलधौ
निमग्नानां दंष्ट्रा मुररिपुवराहस्य भवति ॥ ३

त्वदन्यः पाणिभ्यां अभय-वरदो दैवतगणः
त्वमेका नैवासि प्रकटित-वराभीत्यभिनया ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

भयात् त्रातुं दातुं फलमपि च वाञ्छा-समधिकं
शरण्ये लोकानां तव हि चरणावेव निपुणौ ।। ४

हरिस्त्वामाराध्य प्रणत-जन-सौभाग्य जननीम्
पुरा नारी भूत्वा पुर-रिपुमपि क्षोभमनयत् ।
स्मरोऽपि त्वां नत्वा रति-नयन-लेह्येन वपुषा
मुनीनामप्यन्तः प्रभवति हि मोहाय महताम् ।। ५

धनुः पौष्पं मौर्वी मधुकर-मयी पञ्च विशिखाः
वसन्तः सामन्तो मलय-मरुदायोधन-रथः ।
तथाप्येकः सर्वं हिमगिरिसुते कामपि कृपां
अपाङ्गात्ते लब्ध्वा जगदिदमनङ्गो विजयते ।। ६

क्वणत्कांचीदामा करि-कलभ-कुम्भस्तन-नता
परिक्षीणा मध्ये परिणतशरच्चन्द्र वदना ।
धनुर्बाणान् पाशं सृणिमपि दधाना करतलैः
पुरस्तादास्तां नः पुरमथितुः आहोपुरुषिका ।। ७

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सुधासिन्धोर्मध्ये सुरविटपि-वाटी परिवृते
मणिद्वीपे नीपोपवनवति चिन्तामणिगृहे ।
शिवाकारे मञ्चे परमशिव-पर्यङ्क-निलयां
भजन्ति त्वां धन्याः कतिचन चिदानन्द-लहरीम्
॥ ८

महीं मूलाधारे कमपि मणिपूरे हुतवहं
स्थितं स्वाधिष्ठाने हृदि मरुतमाकाशमुपरि ।
मनोऽपि भ्रूमध्ये सकलमपि भित्त्वा कुलपथं
सहस्रारे पद्मे सह रहसि पत्या विहरसे ॥ ९

सुधाधारासारैः चरणयुगळान्त-र्विगळितैः
प्रपञ्चं सिञ्चन्ती पुनरपि रसाम्नाय-महसः ।
अवाप्य स्वां भूमिं भुजगनिभं अध्युष्टवलयं
स्वमात्मानं कृत्वा स्वपिषि कुलकुण्डे कुहरिणि ॥
१०

चतुर्भिः श्रीकण्ठैः शिवयुवतिभिः पञ्चभिरपि
प्रभिन्नाभिः शंभोः नवभिरपि मूल-प्रकृतिभिः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

चतुश्चत्वारिंशत् वसुदल कलाश्र-त्रिवलय
त्रिरेखाभिः सार्धं तव चरणकोणाःपरिणताः ।। ११

त्वदीयं सौन्दर्यं तुहिन-गिरि-कन्ये तुलयितुं
कवीन्द्राः कल्पन्ते कथमपि विरिञ्चि-प्रभृतयः ।
यदालोकौत्सुक्यात् अमरललना यान्ति मनसा
तपोभिः दुष्प्रापामपि गिरिश-सायुज्य-पदवीम् ।।
१२

नरं वर्षीयांसं नयन-विरसं नर्मसु जडं
तवापाङ्गालोके पतितम् अनुधावन्ति शतशः ।
गळद्वेणीबन्धाः कुच-कलश-विस्रस्त-सिचया
हठात् त्रुट्यत्काञ्च्यः विगळित-दुकूलाः युवतयः ।।
१३

क्षितौ षट्पञ्चाशत् द्विसमधिक-पञ्चाशदुदके
हुताशे द्वाषष्टिः चतुरधिक पञ्चाशदनिले ।
दिवि द्विष्षट् त्रिंशत् मनसि च चतुः षष्टिरिति ये
मयूखाः तेषामप्युपरि तव पादाम्बुजयुगम् ।। १४

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

शरज्ज्योत्स्नाशुद्धां शशियुत जटाजूट मकुटां
वरत्रास-त्राण-स्फटिक-घुटिकापुस्तककराम् ।
सकृन्न त्वा नत्वा कथमिव सतां सन्निदधते
मधुक्षीर-द्राक्षा-मधुरिमधुरीणाः फणितयः।। १५

कवीन्द्राणां चेतः कमल-वन-बालातप-रुचिं
भजन्ते ये सन्तः कतिचित् अरुणामेव भवतीम् ।
विरिञ्चि प्रेयस्याः तरुणतर-श्रृङ्गार-लहरी
गभीराभिः वाग्भिः विदधति सतां रञ्जन-ममी।।
१६

सवित्रीभिर्वाचां शशिमणि शिलाभङ्ग-रुचिभिः
वशिन्याद्याभिः त्वां सह जननि संचिन्तयति यः ।
स कर्ता काव्यानां भवति महतां भङ्गि-रुचिभिः
वचोभिः वाग्देवी-वदन-कमलामोद-मधुरैः।।१७

तनुच्छायाभिस्ते तरुण-तरणि-श्रीसरणिभिः
दिवं सर्वां उर्वीं अरुणिमनि-मग्नां स्मरति यः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

भवन्त्यस्य त्रस्यद्धन-हरिण-शालीन-नयनाः
सहोर्वश्या वश्याः कति कति न गीर्वाण गणिकाः ।।
१८

मुखं बिन्दुं कृत्वा कुचयुगं अधस्तस्य तदधो
हरार्धं ध्यायेद्यो हरमहिषि ते मन्मथ-कलाम् ।
स सद्यः संक्षोभं नयति वनिता इत्यति-लघु
त्रिलोकी-मप्याशु भ्रमयति रवीन्दु- स्तन युगाम् ।।
१९

किरन्तीमङ्गेभ्यः किरण-निकुरुम्बामृतरसं
हृदि त्वामाधत्ते हिमकर-शिलामूर्तिमिव यः ।
स सर्पाणां दर्पं शमयति शकुन्ताधिप इव
ज्वरप्लुष्टान् दृष्ट्या सुखयति सुधाधारसिरया ।।२०

तटिल्लेखातन्वीं तपन-शशि-वैश्वानर मयीं
निषण्णां षण्णा-मप्युपरि कमलानां तवं कलाम् ।
महापद्माटव्यां मृदित-मल-मायेन मनसा
महान्तः पश्यन्तः दधति परमाह्लाद-लहरीम् ।।२१

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

भवानि त्वं दासे मयि वितर दृष्टिं सकरुणां
इति स्तोतुं वाञ्छन् कथयति भवानि त्वमिति यः ।
तदैव त्वं तस्मै दिशसि निजसायुज्य-पदवीं
मुकुन्द-ब्रह्मेन्द्र-स्फुट-मकुट-नीराजितपदाम् ।।

२२

त्वया हृत्वा वामं वपुरपरितृप्तेन मनसा
शरीरार्धं शंभोः अपरमपि शङ्के हृतमभूत् ।
यदेतत् त्वद्रूपं सकलमरुणाभं त्रिनयनं
कुचाभ्यामानम्रं कुटिल शशिचूडालमकुटम् ।।२३

जगत्सूते धाता हरिरवति रुद्रः क्षपयते
तिरस्कुर्वन्नेतत् स्वमपि वपुरीशस्तिरयति ।
सदापूर्वः सर्वं तदिदं अनुगृह्णाति च शिवः
तवाज्ञां आलम्ब्य क्षणचलितयोःभ्रूलतिकयोः।।२४

त्रयाणां देवानां त्रिगुणजनितानां तव शिवे
भवेत्पूजा पूजातव चरणयोर्या विरचिता ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तथा हि त्वत्पादोद्वहन मणिपीठस्य निकटे
स्थिता ह्येते शश्वन्मुकुलित करोत्तंस मकुटाः ।।२५

विरिञ्चिः पञ्चत्वं व्रजति हरिराप्नोति विरतिं
विनाशं कीनाशो भजति धनदो याति निधनम् ।
वितन्द्री माहेन्द्री विततिरपि संमीलितदृशा
महासंहारेऽस्मिन् विहरति सति त्वत्पतिरसौ ।।२६

जपो जल्पः शिल्पं सकलमपि मुद्राविरचना
गतिः प्रादक्षिण्यक्रमणम् अशनाद्याहुति विधिः ।
प्रणामः संवेशः सुखमखिलम् आत्मार्पणदृशा
सपर्यापर्यायस्तव भवतु यन्मे विलसितम् ।। २७

सुधामप्यास्वाद्य प्रतिभयजरामृत्युहरिणीं
विपद्यन्ते विश्वे विधिशतमखाद्या दिविषदः ।
करालं यत्क्ष्वेलं कबलितवतः कालकलना
न शंभोः तन्मूलं तव जननि ताटङ्कमहिमा ।। २८

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

किरीटं वैरिञ्चं परिहर पुरः कैटभभिदः
कठोरे कोटीरे स्खलसि जहि जंभारिमकुटम् ।
प्रणम्रेष्वेतेषु प्रसभमुपयातस्य भवनं
भवस्याभ्युत्थाने तव परिजनोक्तिः विजयते ।। २९

स्वदेहोद्भूताभिः घृणिभिः अणिमाद्याभिः अभितः
निषेव्ये नित्ये त्वामहमिति सदा भावयति यः ।
किमाश्चर्यं तस्य त्रिनयनसमृद्धिं तृणयतो
महासंवर्ताग्निः विरचयति नीराजनविधिम् ।। ३०

चतुः षष्ट्या तन्त्रैः सकमतिसन्धाय भुवनं
स्थितस्तत्तत्सिद्धिप्रसवपरतन्त्रैः पशुपतिः ।
पुनस्त्वन्निर्बन्धादखिल पुरुषार्थैकघटना
स्वतन्त्रं ते तन्त्रं क्षितितलं अवातीतरदिदम् ।। ३१

शिवः शक्तिः कामः क्षिति रथ रविः शीतकिरणः
स्मरो हंसश्शक्रः तदनु च परामारहरयः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अमी हृल्लेखाभिः तिसृभिः अवसानेषु घटिताः
भजन्ते वर्णास्ते तव जननि नामावयवताम् ।। ३२

स्मरं योनिं लक्ष्मीं त्रितयमिदमादौ तव मनो-
र्निधायैके नित्ये निरवधिमहाभोगरसिकाः ।
भजन्ति त्वां चिन्तामणिगुणनिबद्धाक्षवलयाः
शिवाग्नौ जुह्वन्तः सुरभिघृतधाराहुति शतैः ।। ३३

शरीरं त्वं शंभोः शशिमिहिर-वक्षोरुह युगं
तवात्मानं मन्ये भगवति नवात्मानमनघम् ।
अतः शेषः शेषीत्ययम् उभय-साधारणतया
स्थितः संबन्धो वां समरस-परानन्द-परयोः ।।३४

मनस्त्वं व्योम त्वं मरुदसि मरुत्सारथिरसि
त्वमापः त्वं भूमिः त्वयि परिणतायां नहि परम् ।
त्वमेव स्वात्मानं परिणमयितुं विश्ववपुषा
चिदानन्दाकारं शिवयुवतिभावेन बिभृषे ।। ३५

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तवाज्ञाचक्रस्थं तपन-शशिकोटि-द्युतिधरं
परं शंभुं वन्दे परिमिलित-पार्श्वं परचिता ।
यमाराध्यन् भक्त्या रविशशि शुचीनां अविषये
निरालोकेऽलोके निवसति हि भालोकभुवने ।।३६

विशुद्धौ ते शुद्ध-स्फटिक-विशदं व्योमजनकं
शिवं सेवे देवीमपि शिवसमान-व्यवसिताम् ।
ययोः कान्त्या यान्त्याःशशिकिरण-सारूप्यसरणेः
विधूतान्तर्ध्वान्ता विलसति चकोरीव जगती ।। ३७

समुन्मीलत्संवित्कमल-मकरन्दैक-रसिकं
भजे हंसद्वन्द्वं किमपि-महतां मानसचरम् ।
यदालापात् अष्टादश-गुणित-विद्यापरिणतिः
यदादत्ते दोषात् गुणमखिलं अद्भ्यः पय इव ।।३८

तव स्वाधिष्ठाने हुतवहं अधिष्ठाय निरतं
तमीडे संवर्तं जननि महतीं तां च समयाम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

यदालोके लोकान् दहति महसि क्रोधकलिते
दयार्द्रा यादृष्टिः शिशिरं उपचारं रचयति ।। ३९

तटित्वन्तं शक्त्या तिमिर-परिपन्थि-स्फुरणया
स्फुरन्नानारत्नाभरण परिणद्धेन्द्र-धनुषम् ।
तव श्यामं मेघं कमपि मणिपूरैक-शरणं
निषेवे वर्षन्तं हरमिहिर-तप्तं त्रिभुवनम् ।। ४०

तवाधारे मूले सह समयया लास्यपरया
नवात्मानं मन्ये नव-रस-महाताण्डव-नटम् ।
उभाभ्यां एताभ्यां उदयविधिं उद्दिश्य दयया
सनाथाभ्यां जज्ञे जनक-जननीमत् जगदिदम्।।४१

गतैर्माणिक्यत्वं गगन-मणिभिः सान्द्रघटितम्
किरीटं ते हैमं हिमगिरिसुते कीर्तयति यः ।
स नीडे यच्छायाच्छुरणशबलं चन्द्रशकलम्
धनुः शौनासीरं किमिति न निबध्नाति धिषणाम्।।
४२

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

धुनोतु ध्वान्तं नस्तुलित-दलितेन्दीवर-वनम्
घनस्निग्ध-श्लक्ष्णं चिकुर-निकुरुम्बं तवशिवे ।
यदीयं सौरभ्यं सहजम् उपलब्धुं सुमनसो
वसन्त्यस्मिन् मन्ये वलमथनवाटीविटपिनाम् ।।४३

तनोतु क्षेमं नस्तव वदनसौन्दर्यलहरी
परीवाहः स्रोतः सरणिरिव सीमन्तसरणिः ।
वहन्ती सिन्दूरं प्रबल कबरीभारतिमिर
द्विषां बृन्दैः बन्दीकृतमिव नवीनार्क-किरणम् ।।
४४

अरालैः स्वाभाव्यात् अलिकलभ सश्रीभिः अलकैः
परीतं ते वक्त्रं परिहसति पङ्केरुह-रुचिम् ।
दरस्मेरे यस्मिन् दशन-रुचि-किञ्जल्करुचिरे
सुगन्धौ माद्यन्ति स्मर-दहन-चक्षुःमधुलिहः ।।४५

ललाटं लावण्य-द्युति-विमलं आभाति तव यत्
द्वितीयं तन्मन्ये मकुट-घटितं चन्द्रशकलम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विपर्यास-न्यासात् उभयमपि संभूय च मिथः
सुधालेपस्यूतिः परिणमति राकाहिमकरः ।। ४६

भ्रुवौ भुग्ने किञ्चित् भुवन-भयभङ्ग-व्यसनिनि
त्वदीये नेत्राभ्यां मधुकर-रुचिभ्यां धृतगुणम् ।
धनुर्मन्ये सव्येतरकर गृहीतं रतिपतेः
प्रकोष्ठेमुष्टौ च स्थगयति निगूढान्तरमुमे ।। ४७

अहः सूते सव्यं तव नयनं अर्कात्मकतया
त्रियामां वामं ते सृजति रजनी-नायकतया ।
तृतीया ते दृष्टिः दर-दलित हेमाम्भुजरुचिः
समाधत्ते सन्ध्यां दिवस-निशयोः अन्तरचरीम् ।। ४८

विशाला कल्याणी स्फुटरुचिः अयोध्या कुवलयैः
कृपाधाराधारा किमपि मधुराऽऽभोगवतिका ।
अवन्ती दृष्टिस्ते बहुनगर विस्तारविजया
ध्रुवं तत्तन्नाम व्यवहरण योग्या विजयते ।। ४९

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कवीनां सन्दर्भस्तबक-मकरन्दैक-रसिकम्
कटाक्ष-व्याक्षेप - भ्रमर -कलभौ कर्णयुगलम् ।
अमुञ्चन्तौ दृष्ट्वा तव नव-रसास्वाद-तरलौ
असूयासंसर्गात् अलिकनयनं किञ्चिदरुणम् ।। ५०

शिवे श्रृङ्गारार्द्रा तदितरजने कुत्सनपरा
सरोषा गङ्गायां गिरिश-चरिते विस्मयवती ।
हराहिभ्यो भीता सरसिरुह- सौभाग्यजननी
सखीषु स्मेरा ते मयि जननि दृष्टिः सकरुणा ।। ५१

गते कर्णाभ्यर्णं गरुत इव पक्ष्माणि दधती
पुरां भेत्तुः चित्त-प्रशम-रस-विद्रावणफले ।
इमे नेत्रे गोत्राधरपति कुलोत्तंसकलिके
तवाकर्णाकृष्ठ स्मरशर विलासं कलयतः ।। ५२

विभक्तत्रैवर्ण्यं व्यतिकरित लीलाञ्जनतया
विभाति त्वन्नेत्र-त्रितय-मिदम् ईशानदयिते ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पुनः स्रष्टुं देवान् द्रुहिण-हरिरुद्रान् उपरतान्
रजः सत्वं बिभ्रत्तम इति गुणानां त्रयमिव ।। ५३

पवित्रीकर्तुं नः पशुपति-पराधीन-हृदये
दयामित्रै-र्नेत्रैः अरुण-धवल-श्याम-रुचिभिः ।
नदः शोणो गङ्गा तपन तनयेति-ध्रुवममुं
त्रयाणां तीर्थानां उपनयसि संभेदमनघम् ।। ५४

निमेषोन्मेषाभ्यां प्रलयमुदयं याति जगती
तवेत्याहुः सन्तो धरणिधर-राजन्यतनये ।
त्वदुन्मेषाज्जातं जगदिदमशेषं प्रलयतः
परित्रातुं शङ्के परिहृत-निमेषास्तव दृशः ।। ५५

तवापर्णे कर्णे जपनयनपैशुन्य-चकिता
निलीयन्ते तोये नियतमनिमेषाः शफरिकाः ।
इयं च श्रीर्बद्धच्छदपुट-कवाटं कुवलयं
जहाति प्रत्यूषे निशि च विघटय्य प्रविशति ।। ५६

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

दृशा द्राघीयस्या दरदलित नीलोत्पलरुचा
दवीयांसं दीनं स्नपय कृपया मामपि शिवे ।
अनेनायं धन्यो भवति न च ते हानिरियता
वने वा हर्म्ये वा समकर-निपातो हिमकरः ।। ५७

अरालं ते पालीयुगलं अगराजन्य-तनये
न केषामाधत्ते कुसुम-शर कोदण्ड कुतुकम् ।
तिरश्चीनो-यत्र श्रवण-पथ-मुल्लङ्घ्य विलसन्
अपाङ्गव्यासङ्गो दिशति शरसन्धान-धिषणाम्।।५८

स्फुरद्-गण्डाभोग-प्रतिफलित ताटङ्कयुगलं
चतुश्चक्रं मन्ये तव मुख-मिदं मन्मथ-रथम् ।
यमारुह्य द्रुह्यत्यवनिरथम् अर्केन्दुचरणं
महावीरो मारः प्रमथपतये सज्जितवते ।। ५९

सरस्वत्याः सूक्तीः अमृत-लहरी-कौशलहरीः
पिबन्त्याः शर्वाणि श्रवण-चुलुकाभ्यां अविरलम्।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepa

CC-0. In Public Domain. Digitization by eGangotri

चमत्कार श्लाघा-चलित-शिरसः कुण्डल-गणो
झणत्कारैस्तारैः प्रतिवचन-माचष्ट इव ते ।। ६०

असौ नासावंशः तुहिन-गिरि-वंश ध्वजपटि
त्वदीयो नेदीयः फलतु फलं अस्माकमुचितम् ।
वहत्यन्तर्मुक्ताः शिशिरकर-निश्वास गलितं
समृद्ध्या यत्तासां बहिरपि स मुक्तामणि-धरः।।६१

प्रकृत्यऽऽरक्तायास्तव सुदति दन्तच्छदरुचेः
प्रवक्ष्ये सादृश्यं जनयतु फलं विद्रुमलता ।
न बिंबं तद्बिंब-प्रतिफलन-रागात् अरुणितम्
तुलां अध्यारोढुं कथमिव विलज्जेत कलया ।। ६२

स्मित-ज्योत्स्ना-जालं तव वदन-चन्द्रस्य पिबतां
चकोराणां आसीत् अतिरसतया चञ्चु-जडिमा ।
अतस्ते शीतांशोः अमृतलहरीं आम्लरुचयः
पिबन्ति स्वच्छन्दं निशि निशि भृशं
काञ्जिकधिया।। ६३

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अविश्रान्तं पत्युर्गुण-गण-कथाम्रेडन-जपा
जपापुष्पच्छाया तव जननि जिह्वा जयति सा ।
यदग्रासीनायाः स्फटिकदृषदच्छच्छविमयी
सरस्वत्या मूर्तिः परिणमति माणिक्य-वपुषा।।६४

रणे जित्वा दैत्यान् अपहृतशिरस्त्रैः कवचिभिः
निवृत्तैः चण्डांश-त्रिपुर-हर निर्माल्यविमुखैः ।
विशाखेन्द्रोपेन्द्रैः शशिविशद कर्पूरशकला
विलीयन्ते मातस्तव वदनताम्बूलकबलाः।। ६५

विपञ्च्या गायन्ती विविधमपदानं पुररिपोः
त्वयारब्धे वक्तुं चलितशिरसा साधुवचने ।
तदीयैर्माधुर्यैरपलपित-तन्त्री-कलरवां
निजां वीणां वाणी निचुलयति चोलेन निभृतम् ।।
६६

कराग्रेण स्पृष्टं तुहिनगिरिणा वत्सलतया
गिरीशेनोदस्तं मुहुः अधरपानाकुलतया ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepa

CC-0. In Public Domain. Digitization by eGangotri

करग्राह्यं शंभोः मुख-मुकुरवृन्तं गिरिसुते
कथंकारं ब्रूमः तव चुबुकं औपम्यरहितम् ।। ६७

भुजाश्लेषान्नित्यं पुरदमयितुः कण्ठकवती
तव ग्रीवा धत्ते मुख-कमल-नालश्रियं इयम् ।
स्वतः श्वेता कालागुरुबहुल-जम्बालमलिना
मृणालीलालित्यं वहति यदधो हारलतिका ।।६८

गले रेखास्तिस्रो गतिगमकगीतैकनिपुणे
विवाह-व्यानद्ध-प्रगुण-गुणसंख्या प्रतिभुवः ।
विराजन्ते नानाविध-मधुर-रागाकरभुवां
त्रयाणां ग्रामाणां स्थिति-नियम-सीमान इव ते ।।
६९

मृणालीमृद्वीनां तव भुजलतानां चतसृणां
चतुर्भिः सौन्दर्यं सरसिजभवःस्तौति वदनैः ।
नखेभ्यः सन्त्रस्यन् प्रथम-मथनात् अन्धकरिपोः
चतुर्णां शीर्षाणां समं अभयहस्तार्पणधिया ।। ७०

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

नखानां उद्योतैः नवनलिनरागं विहसतां
कराणां ते कान्तिं कथय कथयामः कथमुमे।
कयाचिद्वा साम्यं भजतु कलया हन्त कमलं
यदि क्रीडल्लक्ष्मी–चरण–तल–लाक्षा–रसचणम् ।।
७१

समं देवि स्कन्द–द्विपवदन–पीतं स्तनयुगं
तवेदं नः खेदं हरतु सततं प्रस्नुतमुखम् ।
यदालोक्य आशङ्काकुलित–हृदयो हासजनकः
स्वकुम्भौ हेरम्बः परिमृशति हस्तेन झडिति ।। ७२

अमू ते वक्षोजौ अमृत–रस–माणिक्य–कुतुपौ
न संदेहस्पन्दो नगपतिपताके मनसि नः ।
पिबन्तौ तौ यस्मात् अविदित–वधूसङ्ग–रसिकौ
कुमारावद्यापि द्विरद–वदन– क्रौञ्चदलनौ ।। ७३

वहत्यम्ब स्तम्बेरम–दनुज कुम्भ–प्रकृतिभिः
समारब्धां मुक्तामणिभिः अमलां हार–लतिकाम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepa

CC-0. In Public Domain. Digitization by eGangotri

कुचाभोगो बिम्बाधर-रुचिभिः अन्तः शबलितां
प्रताप-व्यामिश्रां पुरदमयितुः कीर्तिमिव ते ।।७४

तव स्तन्यं मन्ये धरणिधरकन्ये हृदयतः
पयः पारावारः परिवहति सारस्वतमिव ।
दयावत्या दत्तं द्रविड-शिशुः आस्वाद्य तव यत्
कवीनां प्रौढानामजनि कमनीयः कवयिता ।। ७५

हरक्रोधज्वालावलिभिः अवलीढेन वपुषा
गभीरे ते नाभीसरसि कृतसङ्गो मनसिजः ।
समुत्तस्थौ तस्मात् अचल-तनये धूमलतिका
जनस्तां जानीते तव जननि रोमावलिरिति ।। ७६

यदेतत् कालिन्दी तनुतर तरङ्गाकृति शिवे
कृशे मध्ये किञ्चिज्जननि तव यद्भाति सुधियाम् ।
विमर्दात् अन्योन्यं कुच-कलशयोः अन्तरगतं
तनूभूतं व्योम प्रविशदिव नाभिं कुहरिणीम् ।। ७७

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

स्थिरो गङ्गावर्तः स्तन-मुकुल-रोमावलिलता
कलावालं कुण्डं कुसुमशरतेजो-हुतभुजः ।
रतेर्लीलागारं किमपि तव नाभिर्गिरिसुते
बिलद्वारं सिद्धेः गिरिशनयनानां विजयते ।। ७८

निसर्गक्षीणस्य स्तनतटभरेण क्लमजुषो
नमन्मूर्तेः नारीतिलक शनकैः त्रुट्यत इव ।
चिरं ते मध्यस्य त्रुटित-तटिनी-तीरतरुणा
समावस्थास्थेम्नो भवतु कुशलं शैलतनये ।। ७९

कुचौ सद्यः स्विद्यत् तटघटित-कूर्पास-भिदुरौ
कषन्तौ दोर्मूले कनक-कलशाभौ कलयता ।
तव त्रातुं भङ्गात् अलमिति वलग्नं तनुभुवा
त्रिधा नद्धं देवि त्रिवलि लवली-वल्लिभिरिव ।।८०

गुरुत्वं विस्तारं क्षितिधरपतिः पार्वति निजात्
नितंबात् आच्छिद्य त्वयि हरणरूपेण निदधे ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepa

CC-0. In Public Domain. Digitization by eGangotri

अतस्ते विस्तीर्णो गुरुरयमशेषां वसुमतीं
नितम्ब-प्राग्भारः स्थगयति लघुत्वं नयति च ।।८१

करीन्द्राणां शुण्डान् कनक-कदली-काण्डपटलीम्
उभाभ्यां ऊरुभ्यां-उभयमपि निर्जित्य भवति ।
सुवृत्ताभ्यां पत्युः प्रणति-कठिनाभ्यां गिरिसुते
विधिज्ञे जानुभ्यां विबुध-करि-कुम्भ-द्वयमसि ।।
८२

पराजेतुं रुद्रं द्विगुण-शरगर्भौ गिरिसुते
निषङ्गौ जङ्घे ते विषम-विशिखो बाढमकृत।
यदग्रे दृश्यन्ते दश-शर-फलाः पादयुगली
नखाग्रच्छद्मानः सुर-मकुट-शाणैकनिशिताः।।८३

श्रुतीनां मूर्धानो दधति तव यौ शेखरतया
ममाप्येतौ मातः शिरसि दयया धेहि चरणौ ।
ययोः पाद्यं पाथः पशुपति-जटा-जूटतटिनी
ययोः लाक्षालक्ष्मीः अरुणहरिचूडामणि-रुचिः।।
८४

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

नमोवाकं ब्रूमो नयन-रमणीयाय पदयोः
तवास्मै द्वन्द्वाय स्फुटरुचि-रसालक्तकवते ।
असूयत्यत्यन्तं यदभिहननाय-स्पृहयते
पशूनामीशानः प्रमदवन कङ्केलितरवे ।। ८५

मृषा कृत्वा गोत्र-स्खलनं अथ वैलक्ष्य-नमितं
ललाटे भर्तारं चरण-कमले ताडयति ते ।
चिरादन्तः शल्यं दहनकृतं उन्मूलितवता
तुलाकोटिक्काणैः किलिकिलितं ईशानरिपुणा ।।८६

हिमानी-हन्तव्यं हिमगिरि-निवासैक-चतुरौ
निशायां निद्राणं निशि चरमभागे च विशदौ ।
वरं लक्ष्मीपात्रं श्रियमति सृजन्तौ समयिनां
सरोजं त्वत्पादौ जननि जयतश्चित्रमिह किम्।।८७

पदं ते कीर्तीनां प्रपद-मपदं देवि विपदां
कथं नीतं सद्भिः कठिन-कमठीकर्परतुलाम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepa

CC-0. In Public Domain. Digitization by eGangotri

कथं वा बाहुभ्यां उपयमन-काले पुरभिदा
यदादाय न्यस्तं दृषदि दयमानेन मनसा ।। ८८

नखैर्नाकस्त्रीणां करकमल संकोचशशिभिः
तरूणां दिव्यानां हसत इव ते चण्डि चरणौ ।
फलानि स्वःस्थेभ्यः किसलय कराग्रेण ददतां
दरिद्रेभ्यो भद्रां श्रियं अनिश-महाय ददतौ ।। ८९

ददाने दीनेभ्यः श्रियमनिशमाशानु-सदृशीम्
अमन्दं सौन्दर्य-प्रकर-मकरन्दं विकिरति ।
तवास्मिन् मन्दार-स्तबक-सुभगे यातु चरणे
निमज्जन् मज्जीवः करणचरणः षट्-चरणताम् ।।
९०

पदन्यास-क्रीडा-परिचयं इवारब्धु-मनसः
स्खलन्तस्ते खेलं भवन-कलहंसा न जहति ।
अतस्तेषां शिक्षां सुभग-मणि-मञ्जीर-रणित-
च्छलात् आचक्षाणं चरण-कमलं चारु-चरिते ।।
९१

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

गतास्ते मञ्चत्वं द्रुहिण-हरि-रुद्रेश्वर भृतःशिवः
स्वच्छ-च्छाया-घटित-कपट-प्रच्छदपटः ।
त्वदीयानां भासां प्रतिफलन-रागारुणतया
शरीरी श्रृङ्गारो रस इव दृशां दोग्धि कुतुकम् ।। ९२

अराला केशेषु प्रकृति-सरला मन्दहसिते
शिरीषाभा चित्ते दृष-दुपल-शोभा कुचतटे ।
भृशं तन्वी मध्ये पृथुरुरसिजारोह-विषये
जगत् त्रातुं शंभोर्जयति करुणा काचिदरुणा ।।९३

कलङ्कः कस्तूरी रजनिकर-बिम्बं जलमयं
कलाभिः कर्पू रैर्मरकत-करण्डं निबिडितम् ।
अतस्त्वद्भोगेन प्रतिदिनमिदं रिक्त-कुहरं
विधिर्भूयो भूयो निबिडयति नूनं तव कृते ।। ९४

पुरारातेरन्तः पुरमसि ततस्त्वच्चरणयोः
सपर्यामर्यादा तरल-करणानां असुलभा ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepa

CC-0. In Public Domain. Digitization by eGangotri

तथा ह्येते नीताः शतमख-मुखाः सिद्धिमतुलां
तव द्वारोपान्तस्थितिभिः अणिमाद्याभिः अमराः ।।
९५

कलत्रं वैधात्रं कतिकति भजन्ते न कवयः
श्रियो देव्याः को वा न भवति पतिः कैरपि धनैः ।
महादेवं हित्वा तव सति सतीनामचरमे
कुचाभ्यामासङ्गः कुरवक-तरोरपि असुलभः ।।९६

गिरामाहुर्देवीं द्रुहिणगृहिणीं आगमविदो
हरेः पत्नीं पद्मां हर-सहचरीं अद्रि-तनयाम् ।
तुरीया कापि त्वं दुरधिगम-निस्सीम-महिमा
महामाया विश्वं भ्रमयसि परब्रह्म-महिषि ।। ९७

कदा काले मातः कथय कलितालक्त-करसं
पिबेयं विद्यार्थी तव चरण-निर्णेजन जलम् ।
प्रकृत्या मूकानामपि च कविताकारणतया
कदा धत्ते वाणी-मुखकमल-ताम्बूलरसताम्।।९८

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सरस्वत्या लक्ष्म्या विधिहरिसपत्नो विहरते
रतेः पातिव्रत्यं शिथिलयति रम्येण वपुषा ।
चिरं जीवन्नेव क्षपित-पशु-पाश-व्यतिकरः
परानन्दाभिख्यं रसयति रसं त्वद्-भजनवान् ।।
९९

प्रदीप-ज्वालाभि-र्दिवस-कर-नीराजनविधिः
सुधासूतेश्चन्द्रोपल-जल-लवैरर्घ्यरचना ।
स्वकीयै-रम्भोभिः सलिल-निधि-सौहित्यकरणं
त्वदीयाभिर्वाग्भिस्तव जननि वाचां स्तुति-
रियम् ।। १००

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepa

CC-0. In Public Domain. Digitization by eGangotri

श्री चक्रम्



Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Jagadguru Shri Shankaracharya
Swami Shrimath Samsthan
Shri Kanchi Kamakoti Peetham



No.1, Salai Street, Kanchipuram 631502.
Tamilnadu, India
www.kamakoti.org kanchimutt@gmail.com
☎ 044 - 2722 2115

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepa

CC-0. In Public Domain. Digitization by eGangotri





Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal